Postal Regd.No. GAMC- 1553/2022-2024
ISSN 2454-6313

# संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १६ अङ्क : १९१
अप्रैल - २०२२

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2022-2024 issued by SSP Ahmedabad. Valid upto 31-12-2024. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### जीवनं काव्यम्, मरणं महाकाव्यम्

यः जीवति सः जीवः उच्यते। तदर्थं 'जन्तुः' शब्दः अपि प्रचलितः वर्तते। यः प्राणिति – प्राणवायुना आत्मधारणं करोति सः प्राणी उच्यते। यः देहवान् अस्ति सः देही अस्ति। यस्य मरणं ध्रुवम् अस्ति सः मर्त्यः अस्ति। एते सुन्दराः शब्दाः संस्कृतभाषायाः वैभवं सूचयन्ति।

एते शब्दाः सकलां जीवसृष्टिं स्पृशन्ति। मनुष्यः अपि कश्चन विकसितः 'प्राणी' एव खलु। विचारशीलता तम् अन्येभ्यः प्राणिभ्यः भिन्नं करोति। तेन विचारबलेन एव 'कथं जीवनीयम्' इति मनुष्यः वितर्कितवान्। ततः तेन शास्त्राणां रचना कृता। प्राणिना तेन प्राणायामस्य महत्त्वम् अपि विज्ञातम्।

तथापि एतत् सर्वं चिन्तयता मनुष्येण मरणं विस्मृतम्। 'जातस्य हि ध्रुवो मृत्युः' इति कथनेन भगवता श्रीकृष्णेन मरणस्य अवश्यम्भावित्वं घोषितम्। जीवमात्रस्य मरणेन सह जन्म अपि अन्वितं वर्तते। परन्तु तत् वयं केनापि साधनेन प्रतिपादयितुं न शक्नुमः। तदर्थं तु शास्त्रवचनम् एव प्रमाणम्। अथ मरणं प्रकृतिः अस्ति इति कालिदासस्य उक्तिः अस्मान् किञ्चित् विशिष्टं चिन्तयितुं नितरां प्रेरयति।

मरणम् ईश्वरदत्तं – प्राकृतम् अस्ति चेत् ततः भयं किमर्थम्? कस्यचित् सज्जनस्य मरणकाले वयं शोकम् अनुभवामः। तस्य दर्शनं कदापि न भविष्यति इति शोकस्य प्रधानं कारणं वर्तते। तत् मानवसहजम् अपि अस्ति। परन्तु तेन 'तत् अनुचितम् अभवत्' इति चिन्तनं योग्यं न प्रतिभाति। योग्यं वा अयोग्यं वा इति निर्णये अस्माकम् अधिकारः बौद्धिकं सामर्थ्यं वा नास्ति। अपि च अपरिहार्ये वस्तुनि वयं शोकं कियच्चिरं करिष्यामः? शोकः स्वाभाविकः चेदपि तस्य प्रशमनम् आवश्यकम्। नो चेत् समग्रः समाजः एव निरन्तरं शोकग्रस्तः भवेत्। ततः लोकतन्त्रम् अवरुद्धं भवेत्।

वस्तुतः मरणं भगवता सृष्टम् अद्भुतं वरदानम् अस्ति। मरणम् अर्थात् महाकालस्य अङ्के चिरशयनम्। तथापि वयं कमपि जीवं मरणात् रक्षितुं प्रयत्नं कुर्मः। तत्र दोषः नास्ति। मरणान्ते जायमानं बन्धुवर्गस्य दुःखम् अपि निन्दनीयं नैव। तथापि मरणं सर्वथा अनिष्टम् इति वक्तुं साम्प्रतिकं नास्ति। समासेन वक्तुं शक्यते यत् जीवनं काव्यम् अस्ति, मरणं महाकाव्यम् अस्ति।

# विद्याधिकारी

चन्द्रसेनः काञ्चनपुरस्य राजा। पितुः अकालिकमरणस्य अनन्तरं सः बाल्ये एव सिंहासनम् अधिरूढवान्। योग्यं मार्गदर्शनं तेन प्राप्तम् इत्यतः सः दक्षः राजा जातः। युवकस्य शिक्षितस्य तस्य मनसि प्रबला इच्छा आसीत् यत् शिक्षणक्षेत्रे योग्यं परिवर्तनं करणीयम् इति।

अतः सः मन्त्रिणः, पण्डिताः, शिक्षाविदः इत्यादीन् मेलितवान्। सर्वे सम्भूय निर्णीतवन्तः यत् राज्ये एकरूपं शिक्षणं स्यात् इति। यस्मिन् विषये विद्यार्थी रुचिं वहति तस्य विषयस्य अध्ययनाय सः अनुमतः भवेत् इत्यपि तत्र निर्णीतम्। राजनीतिः पौरनीतिः च अवश्यं बोधनीया इत्यपि निर्णयः जातः। आपत्तिकाले आत्मरक्षणाय युवकैः शरीरसामर्थ्यम् अपेक्ष्यते। तस्मात् व्यायामस्य शस्त्रविद्यायाः चापि शिक्षणम् अपि अनिवार्यं स्यात् इत्यपि निर्णीतम्।

एतस्य सर्वस्य क्रियान्वयनं कर्तुं कश्चन समर्थः विद्याधिकारी भवेत् इति ऐकमत्येन तत्र निर्णीतम्। विद्याधिकारिणः अध्यक्षतायां समग्रे राज्ये गुरुकुलेषु योग्यं शिक्षणं भवेत् इति तत्र निश्चितम्। विद्याधिकारिपदं सामान्यं तु न। अतः महाविद्वान् उचितानुचितविवेकी एव तत् पदम् अलङ्कर्तुम् अर्हति। तादृशस्य चयनस्य अधिकारः राजगुरवे महेन्द्रशर्मणे प्रदत्तः। एतत् पदं तु उन्नतम्। उत्तमं वेतनम् अपि भवति। राज्ञः मेलनाय पौनःपुन्येन अवसराः अपि प्राप्यन्ते। अतः बहवः तरुणाः एतस्य पदस्य प्राप्तये अहमहमिकया प्रयासम् आरब्धवन्तः। महेन्द्रशर्मा तु अर्हस्य चयने दक्षः एव। अतः तेन क्रियमाणायां व्यक्तित्वपरीक्षायाम् एव बहवः अनुत्तीर्णाः भवन्ति स्म। तत्र ये चिताः ते अनन्तरस्तरीयायां मौखिकपरीक्षायाम् असफलाः भवन्ति स्म। तस्मात् एकोऽपि चितः न जातः।

काञ्चनपुरे एव सुन्दरवननामके ग्रामे इन्द्रदत्तः नाम कश्चन युवकः निवसति स्म। सः शास्त्रनिपुणः आसीत्। बाल्ये एव अध्ययनाय काशीं गतः सः महत् पाण्डित्यं सम्पादितवान् आसीत्। मया यत् अधीतं तत् अन्ये अध्यापनीयाः इति तस्य प्रबला इच्छा आसीत्। तेनापि विद्याधिकारिपदस्य वार्ता श्रुता। अतः सः अपि राजधानीं प्रति गतः। सः कस्याञ्चित् धर्मशालायां वसन् दिनद्वयं यावत् राजधान्याम् अटितवान्। तस्मात् तेन विविधाः विषयाः सङ्गृहीताः। योग्यं शिक्षणं दातुं समर्थाः तरुणाः कति जनाः उद्योगम् अलभमानाः खेदेन सन्ति, कति च जनाः विद्याभ्यासे आसक्ताः सन्तोऽपि योग्यायाः व्यवस्थायाः अभावतः विद्याभ्यासं कर्तुम् असमर्थाः सन्ति इत्यादिकं तेन ज्ञातम्।

तृतीये दिने सः राजगुरुणा मेलितुं गतः। तावता तु राजगुरोः परीक्षास्तरद्वये अपि सेनापतेः पुत्रः दुर्जयः, कोषाधिकारिणः पुत्रः विक्रमः च जयं प्राप्तवन्तौ आस्ताम्। सामान्यवार्तालापेन महेन्द्रशर्मा अवगतवान् यत् एषः इन्द्रदत्तः अर्हः एव इति। इन्द्रदत्ततः सम्बद्धं सर्वं विवरणं प्राप्य महेन्द्रशर्मा अपृच्छत् – ''दिनद्वयात् पूर्वम् एव भवता राजधानीं प्रति आगतं खलु। आगमनसमनन्तरम् एव अत्र किमर्थं न आगतम्? कुतो वा विलम्बः कृतः?'' इति। ''मया यत् पदम् इष्यते तत् महत्त्वपूर्णम् अस्ति। अतः अत्र आगतेन मया तत्क्षेत्रसम्बद्धं विवरणम् आदौ सङ्गृहीतम्। अस्माकं राजधान्यां नव विद्यालयाः सन्ति। देशे च उपशताः विद्यालयाः सन्ति। किन्तु अस्माकं देशे विद्याम् अपेक्षमाणानां सङ्ख्या महती अस्ति। विद्याम् अपेक्षमाणानां सङ्ख्यायाः अनुगुणं विद्यालयाः सर्वथा न्यूनाः। अन्यच्च, विद्या अपि गुरोः अभिरुच्यनुगुणं दीयमाना अस्ति अद्य। मम तु भाति यत् विद्यार्थिनाम् अभिरुचेः अनुगुणं विद्यायाः दानस्य व्यवस्था स्यात् इति। अतः विद्यालयव्यवस्थायाम् अपि परिवर्तनम् अपेक्ष्यते'' इति उक्तवान् इन्द्रदत्तः।

महेन्द्रशर्मा अवगतवान् यत् इन्द्रदत्तः विद्याधिकारिपदस्य उत्तरदायित्वं सम्यक् अवगतवान् अस्ति इति।

''एतत् विद्याधिकारिपदं प्राप्यते एव इति कथं निर्णीतं भवता ?'' इति अपृच्छत् महेन्द्रशर्मा।

''यस्य अर्हता भवति तेन प्राप्यते एव पदम्। अहं चिन्तयामि यत् मम तादृशी अर्हता अस्ति इति। अतः एव अहम् अत्र आगतः। अन्यच्च, मानवेन सदा आशावादिना भवितव्यम्। यदि आशा एव लुप्येत तर्हि भविष्यं शून्यं स्यात्'' इति उक्तवान् इन्द्रदत्तः।

''एतत् पदं यदि भवता न प्राप्येत...?'' इति अपृच्छत् महेन्द्रशर्मा।

''न प्राप्येत चेदपि न कापि चिन्ता मम। कुत्रचित् गत्वा मम कल्पनानुगुणं गुरुकुलं चालयिष्यामि अहम्। एषः उद्योगः यदि प्राप्येत तर्हि महतीं कल्पनां, योजनां च साकारीकर्तुं शक्नुयाम्'' इति अवदत् इन्द्रदत्तः।

एतेन सन्तुष्टः महेन्द्रशर्मा दुर्जयं विक्रमं चापि आहूय अपृच्छत् – ''महता वेगेन गच्छति मनः। वेगगामिषु द्वितीयं स्थानं कस्य ?'' इति।

''वायोः'' इति अवदत् दुर्जयः।

''न वायोः, अपि तु अग्नेः'' इति अवदत् विक्रमः।

''अहं तु चिन्तयामि – वेगगामिषु द्वितीयं स्थानं वार्तायाः इति। सा क्वचित् वायोः अग्नितः च अधिकवेगेन सञ्चरति। अहं देशस्य कोणे वसामि। तथापि पदस्य वार्ता मया अल्पेन एव कालेन प्राप्ता। एवं वार्ता केन वेगेन सञ्चरति इत्येव न ज्ञायते'' इति अवदत् इन्द्रदत्तः।

''मानवं कः दहति ?'' इति अपृच्छत् महेन्द्रशर्मा।

''अग्निः एव मानवं दहति'' इति दुर्जयः अवदत्।

''अग्निः न केवलं मानवम्, अपि तु सर्वाणि वस्तूनि अपि दहति'' इति अवदत् विक्रमः।

''मिथ्याकलङ्कः मानवम् आधिक्येन दहति। अग्निः बाह्यं दहति चेत् मिथ्याकलङ्कः तु अन्तः एव दहति'' इति अवदत् इन्द्रदत्तः।

''कः मरणकारकः ?'' – महेन्द्रशर्मा अपृच्छत्।

''अनारोग्यम्'' इति अवदत् दुर्जयः। ''चिन्ता'' इति अवदत् विक्रमः।

''अनारोग्यं चिन्ता च मरणं कल्पयतः इति तु सत्यम्। किन्तु तयोः मूलम् अस्ति क्रोधः। सः विवेकं नाशयति। ततः मतिः भ्रश्यति। मतिभ्रष्टः नश्यति। एवं क्रोधः एव सर्वस्य कारणम्'' इति अवदत् इन्द्रदत्तः।

''इन्द्रदत्त ! भवतः एषा उत्तरकथनरीतिः उत्तमा अस्ति'' इति उक्त्वा महेन्द्रशर्मा अपृच्छत् – ''यदि भवता विद्याधिकारिपदं प्राप्येत तर्हि कथं व्यवहरिष्यति भवान् ?'' इति।

''ज्येष्ठानाम् अभिप्रायं स्वीकरोमि आदौ। ये शिक्षिताः युवकाः युवत्यः च सन्ति तेषां कृते विद्यासंस्थायाः आरम्भाय अवकाशं कल्पयिष्यामि। भवादृशानां मार्गदर्शनं स्वीकृत्य योजनां रचयिष्यामि। आसक्ताः सर्वे यथा अध्ययनाय अवकाशं प्राप्नुयुः तथा करिष्यामि'' इति उत्साहेन अवदत् इन्द्रदत्तः।

एतदनन्तरं सप्ताहाभ्यन्तरे एव इन्द्रदत्तः विद्याधिकारित्वेन नियुक्तः जातः। महेन्द्रशर्मा इन्द्रदत्ते यं विश्वासं स्थापितवान् सः व्यर्थः न जातः। अल्पे एव काले इन्द्रदत्तः उत्तमः विद्याधिकारी जातः।

एवं राज्ञः चन्द्रसेनस्य शासनकाले काञ्चनपुरं विद्यार्थिनां कृते कल्पवृक्षः इव जातः।

## रम्या रामायणी कथा

डॉ. सुखेश्वरः झा

**( अनुवर्तते)**

एतदेव विचिन्त्येव-

**कोऽन्वस्मिन् साम्प्रतं लोके गुणवान् कश्चवीर्यवान् ।**
**धर्मज्ञश्चकृतज्ञश्च सत्यवाक्यो दृढव्रतः ॥**
**चारित्रेण च को युक्तः सर्वभूतेषु को हितः ।**
**विद्वान् कः कः समर्थश्च कश्चैक-प्रियदर्शनः ॥**
**आत्मवान् को जितक्रोधो द्युतिमान् कोऽनसूयकः ।**
**कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे ॥**

इति जिज्ञास्य-

**इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः ।**
**नियतात्मा महावीर्यो द्युतिमान् धृतिमान् वशी ॥**
**धर्मज्ञः सत्य-सन्धश्च प्रजानां च हिते रतः ।**
**यशस्वी ज्ञानसम्पन्नः शुचिर्वश्यः समाधिमान् ॥**
**रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता ।**
**वेद-वेदाङ्ग-तत्त्वज्ञो धनुर्वेदे च निष्ठितः ॥**
**सर्व-शास्त्रार्थतत्त्वज्ञः स्मृतिमान् प्रतिभानवान् ।**
**सर्व-लोक-प्रियः साधुरदीनात्मा विचक्षणः ॥** इत्यादि

देवर्षेर्नारदाद् आकर्ण्य, सत्यपराक्रमं, सद्भिः सदानुगतं, गाम्भीर्ये समुद्रसदृशं, धैर्ये हिमवत्तुल्यं, वीर्ये विष्र्णुसमानं, सोमवत् प्रियदर्शनं क्रोधे यमोपमं, क्षमायां पृथिवीसमं, त्यागे धनदमतिशयानं, सत्येऽपरं धर्मराजं, स्पृहणीय-सर्व-गुण-सम्पन्नं रामं विज्ञाय, जीवनस्य प्रत्येकं क्षेत्रे प्रत्येकं व्यवहारे, तम् अनुकरणार्हम् अवगत्य तच्चरिताधारं दुश्चरितारं रामायणं प्रणिनाय । सकलानां मानवानां कृते एकं सदा जाज्वल्यमानदीपकाभरणं प्रकाश-स्तम्भम् इव प्रत्यतिष्ठिपत् । रामायणं पठ्यमानं श्रूयमाणं प्रचार्यमाणं च मानव-वृन्दं कर्तव्याकर्तव्य-विचिकित्सा-तमसः समुचित-कर्तव्य-बोध-ज्योतिर्गमयति।

पुत्रः रामवद् भवतु यः पितुः प्रतिज्ञासङ्केतं श्रुत्वा उपस्थितं राज्याभिषेकं बन्धनमिवावहेल्य सहर्षं वनम् अगात् । पिता दशरथवद् भवतु, यः पुत्रप्रेम्णि जीवनम् अजहात्, किन्तु अस्त्रैणः । भ्राता लक्ष्मणवद् भवतु योऽग्रज-सेवायै सर्वं परित्यक्तुं समर्थः । भ्राता भरतस्तपस्वी तु अथाप्यतिशयेन अनुकरणीयः, यः दत्तं राज्यं, मातरञ्च तृणवद् उपेक्ष्य भ्रातृ-प्रत्यावर्तन-प्रयास-विफलः तदीयाभ्यां दत्ताभ्यां पादुकाभ्यां सन्तुष्य, सर्वेषु विकारहेतुषु सत्स्वपि अविकुर्वाणः संन्यस्यन्नपि राज्यधुरं ऊढवान् । स्त्री सीतेव भवतु, या न केवलं पूर्णिमायाम् अपितु द्वितीयायामपि समानभावेन चन्द्रं भजन्ती चन्द्रिकेव न केवलं राज-प्रासाद-सुखासीनम् अपितु वनवासिनम् अपि स्वामिनं समानभावेन भेजे । निश्छलस्निग्धो जनो न द्वेष्टव्यः, तथा द्वेषं कुर्वती कैकेयी स्वयं वैधव्याहता पुत्रेण च तिरस्कृता अतिमात्रं दुःखम् अवाप्तवती । महता सह मित्रता सुग्रीवस्येव विभीषणस्येव च बलवदपि कष्टं दूरीकृत्य सुखसन्दोहम् उपनयति । दुराचरण-कृत-निर्बन्धं सोदरम् अपि जह्यात् इति बिभीषण-कृत-रावण-परित्यागात् ध्वन्यते । कियान्

अपि बलवान् अत्याचारी विध्वंसम् अवाप्नोति एवेति रावण-वृत्तात् गम्यते। प्रणतस्य आप्तस्य संरक्षकस्य निर्मम-कठोराक्षेपो जनं विपदन्धतमसे पातयति इति सीताहरणवृत्तान्तात् प्रकटी भवति, तुच्छोऽपि स्वजनो नोपेक्ष्यः विभीषणस्योपेक्षणात् एव रावणस्य रावणेश्च रक्षा-रहस्य-भेदात् अजेययोरपि तयोर्विनाशोऽजनिष्ट। लोक-मर्यादां संरिरक्षुणा राज्ञा कस्यापि महतो महीयसः स्वार्थस्य त्यागः अविलम्बं करणीयः इति सीतापरित्यागात् व्यज्यते।

इत्थङ्कारं रामस्य आधिकारिक-प्रासङ्गिक वृत्त-युक्त-समस्त-चरित-चित्रणात् ध्वनिना विविध-कर्तव्यस्य गुप्तमधुरमुपदेशः अखिल-मानवानां जीवन-साफल्याय प्रकृपते।

## मासवार्ता

### आयोजिता उपनिषद् - व्याख्यानमाला



संस्कृतरसिकाः संस्कृतसाहित्यस्य शास्त्राणां च परिचयं प्राप्नुयुः इति विचार्य एकलव्य-संस्कृत-एकेडेमी, संस्कृतविद्याप्रतिष्ठानं चेरिटेबलट्रस्ट, अमदावाद-संस्कृत-एकेडेमी इत्येतेषां संयुक्तोपक्रमेण संस्कृत-साहित्य-रसास्वाद-व्याख्यानमालायाः आयोजनं नियमितं क्रियते। एतस्मिन् एव उपक्रमे उपनिषद्-व्याख्यानमालायाः आयोजनम् अभवत्। एतस्यां विशिष्टव्याख्यानश्रेण्याम् उपनिषदः अध्येतारः एकाम् एकाम् उपनिषदं स्वीकृत्य मनोहरं व्याख्यानं प्रायच्छन्। अस्यां व्याख्यानश्रेण्यां फरवरीमासस्य २३ दिनाङ्के स्वामी श्रीपरमात्मानन्दः सरस्वती 'ईशावास्योपनिषद्' इति विषये, २६ दिनाङ्के स्वामिनी परप्रज्ञानन्दा सरस्वती 'केनोपनिषद्' इति विषये, मार्चमासस्य २ दिनाङ्के आचार्यः सोमशेखरः 'कठोपनिषद्' इति विषये, ५ दिनाङ्के डॉ. स्वामी श्रुतिप्रकाशदासः 'प्रश्नोपनिषद्' इति विषये, ९ दिनाङ्के डॉ. गजेन्द्रः पण्डा 'मुण्डकोपनिषद्' इति विषये, १२ दिनाङ्के डॉ. कमलेशः चोकसी 'माण्डूक्योपनिषद्' इति विषये, १६ दिनाङ्के डॉ. लक्ष्मीनारायणः भट्टः 'तैत्तिरीयोपनिषद्' इति विषये, १९ दिनाङ्के डॉ. बलदेवानन्दः सागरः 'ऐतरेयोपनिषद्' इति विषये, २४ दिनाङ्के डॉ. जानकीशरणः आचार्यः 'छान्दोग्योपनिषद्' इति विषये, २५ दिनाङ्के डॉ. अमृतलालः भोगायता 'बृहदारण्यकोपनिषद्' इति विषये, ३० दिनाङ्के डॉ. राजेशः जोषी 'श्वेताश्वतरोपनिषद्' इति विषये च श्रोतृभ्यः मार्गदर्शनं प्रायच्छन्। व्याख्यानानि श्रुत्वा संस्कृतरसिकाः सन्तुष्टाः आसन्।

## कृपया हसन्तु

एकस्मिन् क्षेत्रे द्वौ खगौ अन्नं खादन्तौ आस्ताम् । तदैव तयोः एकः अवदत् - "भोः, चल । इतः शीघ्रं पलायनं कुर्वः । पश्य तत्र एकः मानवः स्थितोऽस्ति । सः आवाम् एव पश्यन् अस्ति । ततः...

द्वितीयः खगः - (ध्यानेन दृष्ट्वा) चिन्ता मास्तु, सा तु चञ्चा अस्ति ।

प्रथमः खगः - त्वया कथं ज्ञातम् ?

द्वितीयः खगः - ध्यानेन पश्य । तस्य हस्ते दूरभाषः नास्ति !!!

★ ★ ★ ★ ★

हिमखण्डं हस्ते संस्थाप्य रमणः तं हिमखण्डं ध्यानेन पश्यन् आसीत् । तदैव तं दृष्ट्वा नमनः अपृच्छत् - "भोः किं कुर्वन् अस्ति भवान् ?" "एतस्मिन् हिमखण्डे कुत्रापि छिद्रं न दृश्यते तथापि एतस्मात् हिमखण्डात् जलं कुतः स्रवति इति पश्यन् अस्मि ।" इति उदतरत् रमणः ।

## सुभाषितम्

– संस्कृतविकिपीडियाजालस्थानात्

**कामान् दुग्धे विप्रकर्षत्यलक्ष्मीं कीर्तिं सूते दुष्कृतं या हिनस्ति ।**
**तां चाप्येतां मातरं मङ्गलानां धेनुं धीराः सूनृतां वाचमाहुः ॥**

**तात्पर्यम्** – लोके सर्वैः सज्जनानां सहवासं प्राप्तुं यत्नः करणीयः । तेषां सम्पर्केण अस्माकम् अनेके उपकाराः भवन्ति। सर्वेषां मङ्गलानां जननी इव स्थिता एषा सतां वाणी कामधेनुः इव अस्माकं सर्वाः इच्छाः पूरयति। अनिष्टात् अस्मान् दूरीकरोति। अतः एव पण्डिताः सज्जनानां वाचं कामधेनुं वदन्ति।

**कालः पचति भूतानि कालः संहरते प्रजाः ।**
**कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः ॥**

**तात्पर्यम्** – कालः जगति सर्वमपि जीर्णीकरोति। सर्वेषां जीविनां संहारं कालः एव अन्ते करोति। सर्वे जनाः यदा निद्रान्ति तदा अपि कालः जागृतः सन् सर्वान् अवलोकमानः भवति। कालं कोऽपि जेतुं नार्हति। कालस्य प्रभावः कियान् व्यापकः इत्यत्र अवधानम् आकर्षति इदं सुभाषितम्। सामान्यतः 'कालः' इत्येषः शब्दः वेला समयः इत्यस्मिन् परिमिते अर्थे एव उपयुज्यते । दैनन्दिनानि सर्वाणि अपि कार्याणि 'कालानुगुणम्' एव प्रचलन्ति । सूर्योदय–सूर्यास्तमाभ्यां तदनुसारिण्या घट्या च अयं व्यावहारिकः कालः निश्चितः भवति। इदं भवति साङ्केतिकम्। विद्युत्कोषस्य शक्तिह्रासादपि कालस्य गते कापि बाधा न भविष्यति। सः चलति निरन्तरम्। यः नैरन्तर्यं स्वस्य नियतेः अनुगुणं चलेत् सः एव कालः । अस्मात् अविच्छिन्नात् उद्भूता अस्ति कालस्य शक्तिः प्रभावातिशयश्च । कालस्य निश्चिततया एव जगति किञ्चित्प्रमाणेन वा अनुशासनं विद्यते । अत्यन्तं शक्तिमान् अपि कालः जीर्णीकरोति । सस्यं प्राणि–पक्षि–जन्तवः, सर्वे अपि अन्ते कालवशाः भवन्ति । अन्तकस्य अपरं नाम एव 'कालः' । कालः सदा जागृतः भवति । कालगतिः अतिक्रान्तुम् अशक्या इत्ययनेन एव मानवानां स्वनियमनम् आवश्यकं भवति । एवं कालः भवति 'दुरतिक्रमः'।

## ज्ञानसरिता

**श्यामः पटेलः**

**आम्लं द्राक्षाफलम् !** यदा वातावरणे घर्मः आरभते तदा हट्टेषु दृश्यमाना भवति द्राक्षा। माधुर्यगुणोपेता द्राक्षा मुख्यतः आम्लं रुचिं धारयति। द्राक्षा द्विविधा भवति – हरितवर्णीया कृष्णवर्णीया च। तयोः हरितवर्णीया द्राक्षा स्फटिकप्रभां त्वचं धरन्ती रसयुक्ता दृश्यते।

द्राक्षा पृथ्व्याः प्राचीनं लोकप्रियं च फलं वर्तते। प्रायः षड्सहस्रवर्षेभ्यः पूर्वं द्राक्षाफलस्य कृषिः आरब्धाः। भारतदेशे आन्ध्रप्रदेशराज्ये तमिलनाडुराज्ये च द्राक्षाफलस्य महत् उत्पादनं भवति। द्राक्षाफलस्य लताः भवन्ति। ताः लताः प्रायशः ५० फीटपरिमिताः दीर्घाः भवन्ति। ताभ्यः एकस्यां लतायां ४० यावन्तः गुच्छाः भवन्ति। तथा च एकस्मिन् गुच्छे ७० यावन्त्यः द्राक्षाः भवन्ति। द्राक्षायाः पर्णानि अस्माकं करतलः इव भवन्ति। लतासु लघूनि हरितवर्णीयानि पुष्पाण्यपि उद्भवन्ति। द्राक्षाफले ८० प्रतिशतं जलं वर्तते। तस्मिन् "विटामीन सी, के तथा बी" इति पोषकतत्त्वानि भवन्ति। तस्मिन् 'केल्शियम', 'फोस्फरस' तथा 'मेग्नेशियम' नामाख्यानि तत्त्वानि अपि वर्तन्ते। द्राक्षाफलस्य लताः "आयुष्मती भव।" इत्याशीर्वादेन अनुगृहिताः भवन्ति।

अतः सुदीर्घसमयपर्यन्तं ताः लताः प्रतिवर्षं द्राक्षाफलानि ददति। द्राक्षाफलस्य अनेकाः प्रजातयः सन्ति। भारतदेशे 'अताबशाही', 'इसाबेला', 'भोकरी', 'फ्लेम', 'गुलाबी', 'शरद' तथा च 'थोम्सन' नाम प्रजातयः प्रसिद्धाः सन्ति। विश्वे द्राक्षाफलस्य शुष्कफलत्वेन अपि उपभोगः भवति। ततः निर्मितस्य आसवस्य तु भवति एव। तत्र किं बोद्धव्यम् अधिकम्!

घर्मः – heat, हट्टः – market, रुचिः – taste, गुच्छः – bunch, आसवः – wine

## शब्दमञ्जूषा

| | |
|---|---|
| **स्वादः** | taste |
| **उपालम्भः** | taunt |
| **विद्युतपत्रम्** | telegram |
| **दूरभाषः** | telephone |
| **दूरमुद्रणयन्त्रम्** | teleprinter |
| **दूरेक्षणम्** | telescope |
| **दूरदर्शनम्** | television |
| **देवायतनम्** | temple |
| **निविदा** | tender |
| **विषयः** | territory |
| **ईश्वरवादः** | theosophy |
| **ज्वरमापकः** | thermometer |
| **स्तेनः** | thief |
| **सिंहासनम्** | throne |
| **तडित्** | thunderbolt |

## किं भवन्तः जानन्ति ?

**१) कति ऋतवः सन्ति ?**
(क) ४ (ख) ५ (ग) ६ (घ) ७

**२) दिशः सङ्ख्या कति सन्ति ?**
(क) ७ (ख) ८ (ग) ९ (घ) १०

**३) वायोः कति प्रकाराः सन्ति ?**
(क) ७ (ख) ८ (ग) ९ (घ) १०

**४) कति प्रकारकाः कलाः कथिताः सन्ति ?**
(क) ६० (ख) ६१ (ग) ६२ (घ) ६४

**५) कति मात्राः उक्ताः सन्ति ?**
(क) ३ (ख) ७ (ग) १० (घ) १५

**६) योगस्य कति अङ्गानि सन्ति ?**
(क) ६ (ख) ८ (ग) १० (घ) १२

**७) अस्माकं शास्त्रेषु सन्न्यासस्य कति प्रकाराः कथिताः ?**
(क) ४ (ख) ६ (ग) ८ (घ) १०

उत्तराणि – (१) ग (२) घ (३) क (४) घ (५) ख (६) ख (७) क

## सम्पन्नः द्वादशः पदवीदानसमारम्भः




एकलव्य-संस्कृत-एकेडेमीसंस्थानस्य द्वादशः पदवीदानसमारम्भः मार्चमासस्य २७ दिनाङ्के सम्पन्नः । समारम्भेऽस्मिन्'डिप्लोमा इन संस्कृतटिचिंग' इति अभ्यासक्रमे प्रशिक्षितेभ्यः छात्रेभ्यः श्रीजयशङ्कर-रावलमहोदयस्य (अध्यक्षः, गुजरात-राज्य-संस्कृत-बोर्ड, गुजरातसर्वकारः) करकमलाभ्यां पदवीप्रदानम् अभवत् । अभ्यासक्रमोऽयं श्रीसोमनाथ-संस्कृत-विश्वविद्यालयेन सह संलग्नः वर्तते । कार्यक्रमेऽस्मिन् एकलव्य एज्युकेशन फाउन्डेशन एवं च एकलव्य-संस्कृत-एकेडेमीसंस्थानस्य अध्यक्षः श्रीसुनीलः हाण्डामहोदयः, अस्य अभ्यासक्रमस्य सहायकः शिक्षकः श्रीभाविन्पाठकः उपस्थितिं प्रायच्छताम् । प्रसङ्गेस्मिन् एकलव्य-संस्कृत-एकेडेमीसंस्थाने आयोजितेषु विविधेषु अभ्यासक्रमेषु संस्कृतस्य अध्ययनं कृतवद्भ्यः छात्रेभ्यः अपि प्रमाणपत्रप्रदानम् अभवत् । प्रमाणपत्रं प्राप्य सर्वे छात्राः आनन्दिताः आसन् ।

संस्कृत-
**साम्प्रतम्**

नमस्कारः

यदि भवन्तः ''साम्प्रतम्'' मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

वार्षिकं रू - 100
द्वैवार्षिकं रू - 175
त्रैवार्षिकं रू - 250
अङ्कमूल्यं रू - 10

**ग्रीष्मवर्गः 16/05/2022 to 26/5/2022**

**Online/Offline**
**बालसंस्कृतवर्गः**
**Value Education through Sanskrit**
**Class 1 to 4 & 5 to 8**
**10.00am to 11.30am**
**₹ 2000/-**

**Offline**
**Class 9 &10**
**व्याकरणम्**
**with feedback sessions**
**8.00am to 9.30am**
**₹ 3500/-**

contact: 98246 16237

**प्रियवाचकाः**

- **भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।**
- **पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।**

EKLAVYA SANSKRIT ACADEMY
|| जयतु संस्कृतं जयतु भारतम् ||

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006